683

# त्रिसन्ध्या ।

कनकसूर्यप्रभया शोभितम्
धरणीदृश्यम् अतिरम्यम् ।
अर्कसुन्दरकिरणं सर्वं
पतति अन्ते, नवआरंभे ।

नूतनदृश्यं नवलावण्ये
रजनीसूर्य प्रकाशसमेते ।
भुवनं सर्वं नवशोभया
विलसति भूमिः, सामोदम् ।

प्रभाकरकान्तिः नश्यन्ति च
चन्द्रिका शोभा उत्थानम् ।
सुवर्णकिरणस्थाने [स्थाने] अत्र
नवीन श्वेतमयूखसानिध्यम् ।

सुमनससूनाः पतति च नित्यम्
सायंसन्ध्या समयेपि ।
सलिलसमेतम् प्रवहति नद्या
कनककिरणेन, सामोदम् ।

अर्णवशोभा पश्यामि च
दिवाकरशयनकालेच।
अरुणत्रिवर्णे वर्तते भगवान्
रम्यमनोहर सन्ध्यासमये।

विहगाः सर्वे स्वसुन्दर गेहे
प्रत्यागच्छन्ति मेदसमेतम्।
त्रिसंध्या मनोरम समये अत्र
दीपज्योति पश्यामि।

प्रशान्तसुन्दरसमये अत्र
ईश्वरवन्दनमिच्छामि।
सुतरां सर्वे दैविकसुन्दर
सायंसन्ध्या पश्यामि।

निर्मलशून्या वापी चापि
सन्ध्यासमये प्रवहन्ति।
सुवर्णरश्मी दिवाकरेन
पपात तटाक शिरसे च।

नवनीतशोभया गगने वसितुम्
सोमसुन्दरलावण्यम्।
सन्ध्याशेषे समये अत्र
तारापूरितमाकाशम्।

नवआरंभसन्ध्या समये
सर्वाः यच्छन्ति सन्तोषम् ।
सूर्यकृपया ~~वर्तीतान्~~ वर्तितुम् सन्ध्या
चन्द्रकृपयया गच्छन्ति ।

सन्ध्यापुष्पसुगन्धसमेतो
सन्ध्यासमये सौरभ्यम् ।
ईश्वरमन्द्रनिनदेन सन्ध्या-
समयं सर्वं पुण्यम् च ।

दैविकचेतना स्थानं भवति
सन्ध्या सर्वं पश्यामि ।।
प्रभातरजनी संगमसमयं-
रम्यं सायंसन्ध्या समयं ।।